ISSN 2454-1230

द्वादशोऽङ्कः, XII[th] Issue

जुलाई-दिसम्बर, 2020

July-December 2020

# शिक्षाप्रियदर्शिनी

अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता

बहुभाषी-षाण्मासिक-शोधपत्रिका

# SHIKSHA PRIYADARSHINI

(An International Peer-Reviewed Multi-Lingual)
Half-Yearly Research Journal)

मुख्यसंरक्षकः

प्रो. श्रीनिवासः वरखेडी

प्रधानसम्पादकः

प्रो. चांदकिरणसलूजा

प्रबन्धसम्पादकः

प्रो. पवनकुमारः

द्वादशोऽङ्कः जुलाई- दिसम्बर, 2020 ISSN 2454-1230

# शिक्षाप्रियदर्शिनी

अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता बहुभाषी-षाण्मासिक-शोधपत्रिका

# SHIKSHA- PRIYADARSHINI

(An International Peer-Reviewed Multi-Lingual Half-Yearly Research Journal)

**प्रधानसम्पादकः**

**प्रो. चाँदकिरणसलूजा**

**निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली**

**सम्पादकाः**

**डॉ. सुनीलकुमारशर्मा**

सहायकाचार्यः, शिक्षासंकायः, श्री लालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**डॉ. नितिनकुमारजैनः**

सहायकाचार्यः, शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः, भोपालम्, मध्यप्रदेशः

**डॉ. आरती शर्मा**

सहायकाचार्यः, शिक्षासंकायः, श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

**प्रबन्धसम्पादकः**

**प्रो. पवनकुमारः**

परीक्षानियन्त्रकः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली

**प्रकाशकः**

**संस्कृतसंस्कृतिविकाससंस्थानम्**

**बाडी, धौलपुरम्, राजस्थानम् – 328021**

# शिक्षाप्रियदर्शिनी (अङ्कः 12)

## अनुक्रमणिका


viii

प्रधान सम्पादकीय ix

प्रबन्ध सम्पादकीय 1

1\. प्राचीनभारतीयशिक्षाव्यवस्था

डा.सोमनाथदाशः 11

2\. महाकवि-कालिदासकवितायां व्यङ्ग्यार्थवैभवम्

डा. बि. कामाक्षम्मा 15

3\. सीताहरणनाटके पर्यावरणचेतना

डॉ. सुनीलकुमारशर्मा 23

4\. संस्कृतभाषाशिक्षणे उपयुज्यमानाः शिक्षणविधयः

डॉ.बि.वेङ्कटलक्ष्मीनारायणः 31

5\. नारायभट्टतिरेः अधिगमविचारः

डा. इक्कुर्ति वेङ्कटेश्वर्लुः 38

6\. भाषा कौशलानि भाषाशिक्षा च

डा. रमणमिश्रः 45

7\. शिक्षाशास्त्रदृष्ट्या ज्योतिषशिक्षणविधीनां प्रयोगात्मकमध्ययनम्

डॉ. मुकेश शर्मा 61

8\. तर्कसङ्ग्रहदिशा पदार्थत्त्वद्रव्यत्त्वनिरूपणपुरस्सरम्

पृथिव्यप्तेजवाय्वादिद्रव्यनिरूपणम्

रागिनी शर्मा 69

9\. वृत्तिनिरूपणम्

जगत् ज्योति पात्रः 77

10\. प्रशिक्षणार्थीनां प्रशिक्षणसन्दर्भे संघर्षसमाधानयोग्यता

सोनिया साहु 83

11\. ऑनलाइन शिक्षा : कुछ पूर्वधारणाएं एवं प्रवृत्तियां

डा. नितिन कुमार जैन 91

12\. बाल्यकिशोरावस्था में अभिप्रेरणा

डा. कृष्णकान्त तिवारी 99

13\. प्रभावित विश्व : परिवर्तित शिक्षा

डा. दाताराम पाठक 107

14\. सृष्टि-उत्पत्ति

श्रद्धा तिवारी

शिक्षाप्रियदर्शिनी
(अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता बहुभाषीयशोधपत्रिका)
द्वादशोऽङ्कः जुलाई-दिसम्बर, 2020 ISSN : 2454-1230

## 2.

# महाकवि-कालिदासकवितायां व्यङ्ग्यार्थवैभवम्

**डा. बि. कामाक्षम्मा (सहायकाचार्या)**
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नई दिल्ली

---

स्त्रीषु करचरणाद्यवयवेभ्यः व्यतिरिक्ततया अन्यदेकं लोचनामृतं यल्लावण्यं प्रकाशते तद्वत् महाकवीनां वाणीषु प्रसिद्धवाच्यार्थव्यतिरिक्ततया व्यङ्ग्यार्थः सहृदयहृदयाह्लादकारी प्रकाशते। अत एव ध्वनिकारेणोक्तं -

**प्रतीयमानं पुनरन्यदेव**
**वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत् प्रसिद्धावयवातिरिक्तं**
**विभाति लावण्यमिवाङ्गनासु।। ।।ध्वन्यालोकः.1/ 4।।**

स एवार्थः काव्यात्मतया अङ्गीकृतः सहृदयैः आलङ्कारिकैः काव्यस्यात्मा स एवार्थः इति।

तत् स्वादुवस्तुतत्त्वं निःष्यन्दमाना महाकवीनां भारती अलोकसामान्यं परिस्फुरन्तं प्रतिभाविशेषम् अभिव्यनक्ति। येन अस्मिन् अतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयः द्वित्राः पञ्चषाः वा महाकवयः इति गण्यन्ते। तदेव उच्यते ध्वनिकारेण –

**सरस्वतीस्वादु तदर्थवस्तु**
**नि:ष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति**
**परिस्फुरन्तं प्रतिभाविशेषम्।। ।।ध्वन्यालोकः.1/ 6।।**

वाच्यवाचक-लक्षणमात्रकृतश्रमाणां काव्यतत्त्वार्थ-भावनाविमुखानां स्वरश्रुत्यादिलाक्षणमिवाऽप्रगीतानां गान्धर्वलक्षणविदामगोचर एवासावर्थः। सोऽर्थो यस्मात्केवलं काव्यार्थतत्त्वज्ञैरेव ज्ञायते। अत एवोक्तं ध्वनिकारेण

**शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।**
**वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्।। ।।ध्वन्यालोकः.1/ 7।।**

एवं तादृशस्य काव्यात्मभूतस्य व्यङ्ग्यार्थस्य उदाहरणतया अनेके अनेकान् श्लोकान् प्रदर्शयामासुः। तेषु काव्यप्रकाशकारेण मम्मटेन दत्तमिदं पद्यम्।

**नि:शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**

ISSN 2454-1230

# शिक्षाप्रियदर्शिनी

# SHIKSHA PRIYADARSHINI

Peer-Reviewed Multi-Lingual)
Half-Yearly Research Journal)

मुख्यसंरक्षक:

संरक्षक:

प्रधानसम्पादक:

प्रवन्धसम्पादकौ

# अनुक्रमणिका


सम्पादकीय [illegible]

प्रबन्ध सम्पादकीय [illegible]

संरक्षकवाक् [illegible]

शिक्षाप्रियदर्शिनी के गत अंक- 16 की समीक्षा [illegible]

संस्कृतालेखा:

1. सांख्ययोगदर्शनयो: कैवल्यस्यावधारणा 1
   प्रो. मारकण्डेयनाथतिवारी
2. अष्टाध्याय्यां चकारविमर्शः 8
   डॉ. भगतसिंह आर्य:
3. महाभारतान्तर्गत-उशीनरोपाख्यानम् - एकं परिशीलनम् 15
   डा.बी.कामाक्षम्मा
4. शिक्षणप्रशिक्षणयो: सम्प्रत्यय: 22
   डॉ. रमणमिश्र:
5. बृहत्त्रय्यां निहितानि शैक्षिकतत्त्वानि 26
   सलिलकान्त: त्रिपाठी
6. हिरण्यगर्भनासदीयसूक्तयो: दर्शनिकविचारधारा: 35
   अभिलाष महापात्र
7. पं.सम्पूर्णदत्तमिश्रनाटकेषु कीर्तिकामेश्वर: 46
   डॉ. गेहप्रदीप शर्मा
8. आपदाप्रबन्धने छात्रशिक्षकाणां जागरूकता 50
   विपिनकुमारशुक्ला
9. शब्दप्रमाणमन्यमानाम्अस्माकं कृते वेदादयो: ग्रन्थानां कथं सदा आदरार्हा:? 55
   डॉ कैलाश चन्द मीणा / डॉ. जगदीश प्रसाद जाट:
10. पुराणवाङ्मये काव्यत्वस्य मूल्याङ्कनम् 66
    डॉ. राघवकुमारझा:
11. माध्यमिकस्तरे शैक्षिकोपलब्धे: तात्पर्यम् 71
    गंगाधरपाण्डेय:
12. बहुभाषिकता 77
    **डॉ. सुनील कुमार शर्मा**
13. शिक्षणविधियों में नवाचार 81
    डॉ. नितिन कुमार जैन एवं डा. कमलादेवी सुयाल
14. बाल्यकिशोरावस्था में व्यक्तित्वविकास 88
    डॉ. कृष्णकान्त तिवारी

शिक्षाप्रियदर्शिनी
(अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता
बहुभाषीयशोधपत्रिका)
सप्तदशोऽङ्कः, जनवरी-जून, 2023
ISSN : 2454-1230

# महाभारतान्तर्गत-उशीनरोपाख्यानम् - एकं परिशीलनम्

डा. बी.कामाक्षम्मा
सहायकाचार्या
श्रीलालबहदुरशास्त्री-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नवदेहली-16

**प्रस्तावना**

**महाभारतम्-** महाभारतं भारतदेशे सर्वाधिकसम्मानग्रन्थः। रामायण-महाभारते भारतीयसंस्कृतेः उपजीव्ये स्तः। महाभारतं न केवलमेको ग्रन्थः अपि तु महासागरः। यस्मिन् भारतस्य संस्कृतिः,सभ्यता,इतिहासः,दर्शनम्, विज्ञानम्, धर्मः सर्वमुपलभ्यते। अत एवोक्तम्-

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।।**

न केवलं भारते अपि तु विश्वस्मिन् विश्वे महाभारतान्तर्गत-उपाख्यानानामादरणम् अस्तीति सर्वविदितविषयः एव।

**अख्यानमुपाख्यानञ्च -**

सर्वादौ आख्यानशब्दस्योल्लेखः ऐतरेणब्राह्मणान्तर्गते शुनःशेपोपाख्याने (18-10), एवं सौपर्णोपाख्याने दरीदृश्यते। शतपथब्राह्मणे (3-6-2-7)अस्यैव व्याख्याननाम्ना उल्लेखो दृश्यते। आख्याने इतिवृत्तम् ऐतिहासिकं भवति अर्थात् घटितघटनैव आख्यानस्य प्राणभूता भवति। कविः सरसतासम्पादनायै कथापरिवर्तने, सन्निवेशयोजने स्वतन्त्रो भवति। चक्षिङ् धातोः व्यक्तायां वाचि इत्यस्मिन्नर्थे आख्यानशब्दोऽयं निष्पद्यते। आख्यानस्य पूर्णतासम्पादनायै सहकारकं भवति उपाख्यानम्।
उपाख्यानस्य नाम रूपकेषु प्रासङ्गिककथावस्तु इति उच्यते। प्रधानभूतकथावस्तु आधिकारिकम् इति तदङ्गभूतकथावस्तु प्रासङ्गिकमिति उच्यते।

**तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः**
**अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः।**
**तन्निर्वृत्तमभिव्यापि वृत्तं स्यादाधिकारिकम्।।दशरूपकम्।।**

**संक्षिप्तकथा**

अस्य कथावस्तु इत्थं वर्तते –

एतदुपाख्यानं महर्षिः लोमशः युधिष्ठिरं श्रावयामास। एकदा इन्द्रः अग्निश्च महाराज्ञः उशीनरस्य माहात्म्यं ज्ञातुमिष्टवन्तौ। अतः इन्द्रः श्येनरूपं, अग्निः कपोतरूपं च धृत्वा उशीनरस्य यज्ञमण्डपं जग्मतुः। तदा राजा कश्चन यागमनुष्ठीयमानः आसीत्। तदा अत्यन्तं भयभीतः कपोतः श्येनादात्मानं रक्षितुं शरणार्थी भूत्वा राज्ञः अङ्कमाश्रितवान्। तदभ्यन्तरे एकः श्येनः आगत्य

UGC - CARE LISTED

ISSN: 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

## (उत्कर्षमहोत्सवविशेषाङ्कः)

(A Refereed & Peer-Reviewed Quarterly Research Journal)

49 वर्षे संयुक्ताङ्कः (जनवरी-दिसम्बर) 2024 ई.

प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

सम्पादकः
प्रो. शिवशङ्करमिश्रः
शोधविभागाध्यक्षः

सहसम्पादकः
डॉ. ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
नवदेहली-16

# विषयानुक्रमः

## संस्कृतविभागः

1. ब्रह्मजिज्ञासेत्यत्र प्रसज्यमाना समाससमालोचना 1–6

- प्रो. जयकान्तसिंहशर्मा

2. ललितासहस्रनामालोके सौन्दर्यलहरी 7–14

- प्रो. सतीशः के. एस्.

3. रावणवधमहाकाव्ये करणाधिकरणकारकयोरनुशीलनम् 15–24

- डॉ. प्रमोदकुमारशर्मा

4. जातिपदार्थविषये शाब्दिकमतम् 25–28

- प्रो. रामनारायणद्विवेदी

5. सांवेगिकबुद्धिर्मौनोपवेशनञ्च 29–36

- प्रो. के. भरतभूषणः

6. मिथिलायां वेदाध्ययनपरम्परा 37–42

- विद्यावाचस्पतिः प्रो. सुन्दरनारायणझा

7. धर्मशास्त्रीयन्यायिकप्रक्रियानुसारं विभाज्याविभाज्यसम्पत्तिविमर्शः.... 43–50

- प्रो. सन्तोषकुमारशुक्लः
- श्री अभिजित् देबशर्मा

8. संस्कृतसाहित्यविकासे जैनाचार्याणामवदानम् 51–56

- प्रो. अनेकान्तकुमारजैनः

9. संस्कृतप्रहेलिकासम्पद्विमर्शः 57–67

- डॉ. टी. महेन्द्रः

10. पाणिनीयव्याकरणे विकल्पबोधकपदानामुपयोगिता 68–72

- डॉ. रामबदनपाण्डेयः

11. महाभारतान्तर्गत-यवक्रीतोपाख्यानम् : एकं परिशीलनम् 73–80

- डॉ. बी. कामाक्षम्मा

GC–CARE Listed
नवरी-दिसम्बर, 2024

शोधप्रभा ( उत्कर्षमहोत्सवविशेषाङ्कः )
वर्ष : 49, संयुक्ताङ्कः

# महाभारतान्तर्गत-यवक्रीतोपाख्यानम् : एकं परिशीलनम्

- डॉ.बी.कामाक्षम्मा *

## स्तावना

**महाभारतम्** – महाभारतं भारतदेशे सर्वाधिकसम्मानग्रन्थः। रामायण–महाभारते भारतीयसंस्कृतेरुपजीव्ये स्तः। महाभारतं न केवलमेको ग्रन्थः अपि तु महासागरः। यस्मिन् भारतस्य संस्कृतिः, सभ्यता, इतिहासः, दर्शनम्, विज्ञानम्, धर्मः सर्वमुपलभ्यते। अत एवोक्तम् –

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥**

न केवलं भारते अपि तु विश्वस्मिन् विश्वे महाभारतान्तर्गत–उपाख्यानानामादरणम् अस्तीति सर्वविदितविषयः एव।

**आख्यानमुपाख्यानञ्च –**

सर्वादौ आख्यानशब्दस्योल्लेखः ऐतरेयब्राह्मणान्तर्गते शुनःशेपोपाख्याने (18–10), एवं सौपर्णोपाख्याने दरीदृश्यते। शतपथब्राह्मणे (3–6–2–7) अस्यैव व्याख्याननाम्ना उल्लेखो दृश्यते। आख्याने इतिवृत्तम् ऐतिहासिकं भवति अर्थात् घटितघटनैव आख्यानस्य प्राणभूता भवति। कविः सरसतासम्पादनायै कथापरिवर्तने, सन्निवेशयोजने स्वतन्त्रो भवति। **चक्षिङ् धातोः व्यक्तायां वाचि** इत्यस्मिन्नर्थे आख्यानशब्दोऽयं निष्पद्यते। आख्यानस्य पूर्णतासम्पादनायै सहकारकं भवति उपाख्यानम्।

रूपकेषु प्रधानभूतकथावस्तु 'आधिकारिकम्' इति तदङ्गभूतकथावस्तु 'प्रासङ्गिकमिति' उच्यते। प्रासङ्गिकेतिवृत्तस्य पुनः पताका, प्रकरीति भेदद्वयम्। प्रधानेतिवृत्तेन सह दूरं यदनुवर्तते सा पताका, प्रसङ्गवशात् किञ्चिद्दूरं यदनुवर्तते सा प्रकरीति उच्यते।

**इदं पुनर्वस्तु द्विविधं परिकल्प्यते ।**
**आधिकारिकमेकं स्यात्प्रासङ्गिकमथापरम् ॥**
**अधिकारः फले स्वाम्यमधिकारी च तत्प्रभुः ।**
**तस्येतिवृत्तं कविभिराधिकारिकमुच्यते ॥**
**अस्योपकरणार्थं तु प्रासङ्गिकमितीष्यते ।**[1]

---

* सहायकाचार्या, श्रीलालबहदुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली–16

1. साहित्यदर्पणम्, 6/42, 43